শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমহালক্ষ্ম্যৈ নমঃ

শ্রীমদ্বেঙ্কটাধ্বরিরিৱিরচিতে শ্রীলক্ষ্মীসহস্রে

# ॥ মঙ্গলাখ্যস্তবকঃ সপ্তমঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমহালক্ষ্ম্যৈ নমঃ

# ॥ মঙ্গলাখ্যস্তবকঃ সপ্তমঃ ॥

ভাগধেযং ভজেযং তৎ ফণিশৈলকুটুম্বিনঃ।
মনীষিণো যদেৱাহুঃ মঙ্গলানাং চ মঙ্গলম্॥ **7.1** ॥

তনোতি সিন্ধোস্তনযে কথঞ্চিৎ
তৱাংশলেশো যদি সন্নিধানম্।
তৃণোঽপি মাঙ্গল্যমুপৈত্যখর্ৱং
দূর্ৱাদিরেৱাত্র নিদর্শনং নঃ॥ **7.2** ॥

গরুডধ্ৱজ ৱল্লভে শুভে
গণৱর্ণাদিজ দোষ শান্তযে।
ৱরদে তৱ ৱাচকং পদং
কৱযঃ কাৱ্যমুখে প্রযুঞ্জতে॥ **7.3** ॥

ৱিদুঃ পদাব্জং তৱ ৱিশ্ৱমঙ্গলং
হরিপ্রিযে যৎপরিৱার ৱৈভৱাৎ।
সমাশ্রিতা স্থাণুমপি শ্মশানগং
জগত্যপর্ণাঽজনি সর্ৱমঙ্গলা॥ **7.4** ॥

তাতো দুগ্ধপযোনিধিঃ সহভুৱস্তে কৌস্তুভাদ্যাঃ শুভাঃ
দেৱস্ত্ৱৱ্যয দিৱ্য মঙ্গলৱপুঃ শ্রীৱৎসলক্ষ্মা পতিঃ।
নাম শ্রীরিতি ধাম পদ্মমখিল ক্ষেমঙ্করঃ পক্ষিরাট্
ৱাহঃ কো হরিৱল্লভে কথযিতুং মাঙ্গল্যমীষ্টে তৱ॥ **7.5** ॥

যস্ত্ত শ্রীর্ন পুরস্করোত্যৱিনযাদ্বস্ত্ত ৎৱদীযং শুভং
তস্মিন্ নৃত্যতি দুর্গতিশ্চিরতরং তত্র প্রমাণং তু নঃ।
দুৰ্ৱাসঃ প্রতিঘোদ্গমাদধিগতঃ স্বৰ্ৱাসৱত্ত্বচ্যুতিং
দিৱ্যং মাল্যমহো মদাদগণযন্ দেৱঃ শচীৱল্লভঃ॥ **7.6**॥

দৃষ্টিঃ শিৱোদযকরী করুণাভিরার্দ্রা
যুক্তং তৱাম্ব ভজতে ভৱতারকৎৱম্।
জ্যেষ্ঠাশ্রযোঽপি মঘৱান্ স্তুতিভিস্তৱাহো
প্রাপ্যাতুলোঽজনি পুনর্ৱসুৱর্গমুচ্চম্॥ **7.7**॥

ফণিশযদযিতে তৱ স্তুতিঃ
ভগৱতি পাৱনরীতিমাশ্রিতা।
অৱিতথমত এৱ তদ্বলাৎ
শুভমগতোঽপি সুমঙ্গলত্যহো॥ **7.8**॥

ৎৱদ্ ভ্রাতুরিন্দোরনুচারযোগাৎ
প্রাযেণ মূঢোঽপ্যশুভঃ কুজন্মা।
সুভূৱিভূষে স বুধাগ্রগণ্যো
বভূৱ জগ্রাহ চ মঙ্গলাখ্যাম্॥ **7.9**॥

জগৃহে ক্বচিদচ্যুতোঽৱতারে
জগতাং মাতরিনান্ৱযং পুরা যঃ।
তমজস্রমিনান্ৱযং নযন্তী
শিৱতাতং শিৱতাতিমাতনোষি॥ **7.10**॥

কূৎপত্তিমূলমপি কেশৱপাদপদ্মং
কল্যাণি তে শুভ করাম্বুজ মেলনেন।
ত্রৈলোক্যমঙ্গল মজীজনদব্ধিকন্যে
তীর্থং শিৱৎৱপরিদাযি কপালিনোঽপি॥ **7.11**॥

কন্যে দুগ্ধোদন্ৱতস্তাৱকীনং
    মন্যে রূপং মঙ্গলং মঙ্গলানাম্।
যৎসাৱর্ণ্যপ্রাপ্তভদ্রা হরিদ্রা
    সৌমঙ্গল্যং সংৱিধত্তে ৱধূনাম্॥ **7.12** ॥

যস্তে রূপমুপাস্তে
    শুভং প্রপন্নং শ্রিযং হরিদ্রাজাম্।
তৎক্রতুনযেন স ৱহেৎ
    অমুত্র জননি শ্রিযং হরিদ্রাজাম্॥ **7.13** ॥

॥ ইতি শ্রীমদ্বেঙ্কটাধ্ৱরিৱিরচিতে শ্রীলক্ষ্মীসহস্রে মঙ্গলাখ্যস্তবকঃ সপ্তমঃ ॥